भागवतोक्ते द्वादशमन्वन्तरे १४सप्तर्षिभेदे तपोमूर्त्तिशब्दे प्रमाणं दृश्यम् ।

**तपस्विपत्र** पु० तपस्विप्रियं पत्रमस्य । दमनकवृक्षे राजनि० ।

**तपात्यय** पु० तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले । १वर्षाकाले "तपात्यये वारिभिरुक्षिता नवैः" । कुमा० । "तपात्यये पुष्पफलैरुपेतं महावनं राष्ट्रपतिर्ददर्श" भा० व० २४ अ० । ६त० । २ग्रीष्मस्यावसाने च ।

**तपान्त** पु० तपस्यान्तो यत्र । १वर्षाकाले "ववर्ष शरवर्षेण तपान्ते जलदो यथा" भा० भी० ५४ अ० । ६त० । २ग्रीष्मस्यावसाने च ।

**तपित** त्रि० भ्वा० तप—दाहे क्त । तप्ते द्विरूपकोषः ।

**तपिनी** स्त्री नदीभेदे शब्दार्थचि० ।

**तपिष्ठ** त्रि० अतिशयेन तप्ता तप्तृ+इष्ठन् तृणोलोपः । अतिशयेन तापके । "तपिष्ठेन शोचिषा यः सुराधाः" ऋ० ४।५।४।

**तपिष्णु** त्रि० तप—बा० इष्णुच् । तापकर्त्तरि तपने । "महता तपसा देवस्तपिष्णुः सेवितो मया । प्रीतेन चाहं विभुना सूर्य्येणोक्तस्तथाऽनघ !" भा० शा० ३२० अ० ।

**तपीयस्** त्रि० अतिशयेन तप्ता तप्तृ+ईयसुन् तृणोलोपः । १भृशं तप्तरि २तपस्याकारके "अतप्यतास्मिन् किल लोकतापनं तपस्तपीयांस्तपतां समाहितः" भाग० २।६।८।

**तपु** त्रि० तप—उन् । १तापके "तपोष्पवित्रं विततं दिवस्पदे" ऋ० ६।८३।२ "तपोः शत्रूणां तापकस्य" भा० । २तापयुक्ते ३तप्ते च । "तपुर्ययुस्तु चरुरग्निवाँ इव" ऋ० ७।१०४।२ तपुस्तप्तः" भा०

**तपुषि** त्रि० तप—उसिन् वेदे नेकारस्य इत् । तापके । "ब्रह्मद्विषे तपुषिं हेतिमस्य" ऋ० ३।३०।१७;६।५२।३। "तपुषिस्तपतेर्हेतिर्हन्तेः" निरु० ६।२ स्त्रियां कृदिकारान्तत्वात् वा ङीप् । २क्रोधे स्त्री निघण्टुः । क्रोधस्य चित्ततापकत्वात् तथात्वम् ।

**तपुस्** पु० तप—उसि । १सूर्य्ये २अग्नौ च उणा० । ३तापयुक्ते ४तापके च त्रि० । "तपुर्जम्भ ! यो अस्मध्रुक्" ऋ० १।३६।१६ हे तपुर्जम्भ ! तप्यमानरश्मियुक्त ! अग्ने !" भा० "तपुरग्राभिर्ऋष्टिभिः । १०।८७।२३। "तपुरग्राभिस्तपनशीलाग्राभिः" भा० "तपूंषि तस्मै वृजिनानि सन्तु" ऋ० ६।५२।२

**तपोज** त्रि० तपसः तपस्यातः अग्नेर्वा जायते जन—ड । १तपस्याजाते २अग्निजाते अप्सु स्त्री । "ऋषीँस्तपस्वतो यम तपोजा अपि गच्छतात्" ऋ० १०।१५४।५ "वाचो बन्धुस्तपोजाः" यजु० १०।६ "वाचो बन्धुः वाच्या बन्धुभूताः "यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदतीति" श्रुतेः "आपोमयी वागिति" सामश्रुतेश्च । तथा तपोजा तपःशब्देनात्राग्निरुच्यते तपसोऽग्नेर्जातास्तपोजाः अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाह तपोजाः" इति श्रुतेः "वायोरग्निरग्नेराप" इति शत०ब्रा० ५।३।५।१७। श्रुत्यन्तराच्च" वेददी०

**तपोदान** न० तप इव दानमत्र । तीर्थभेदे । "पुण्यतीर्थेषु कलिलं कुरुक्षेत्रं प्रकीर्त्तितम् । सिन्धूत्तमस्तपोदानं जम्बूमार्गमथापि च" भा० आनु० १६५ अ० ।

**तपोधन** त्रि० तपोधनं यस्य । तपोमात्रकारके १तपस्विनि । "तपोधनाभ्यागमसम्भवामुदः" माघः तत्प्रियत्वात् २दमनकवृक्षे पु० राजनि० । ३मुण्डीरीवृक्षे स्त्री मेदि० । तप एव धनम् । ४तपोरूपधने न० । "यस्तु तावदतिक्रान्तं धर्मद्वारं तपोधनम्" । भा०आनु०५२अ० । तपोधनं मूल्यं यस्य । ५तपसा लभ्ये स्वर्गादौ त्रि० "सर्वरत्नवरः स्वर्गे पारिजातस्तपोधनः" हरिवं० १२८ अ० ।

**तपोधृति** पु० तपसि धृतिः सन्तोषो यस्य । १तपोरते तपस्विनि चतुर्थमन्वन्तरे २भार्गवे सप्तर्षिभेदे "चतुर्थे चैव सावर्णे ऋषीन् सप्त निबोध मे" इत्युपक्रमे "द्युतिर्वसिष्ठपुत्रश्च आत्रेयः सुतपास्तथा । आङ्गिरास्तपसोमूर्त्तिस्तपस्वी काश्यपस्तथा । तपोऽशनश्च पौलस्त्यः पौलहश्च तपोरविः । भार्गवः सप्तमस्तेषां विज्ञेयस्तु तपोधृतिः" हरिवं० ७ अ० ।

**तपोनिधि** पु० तपो निधीयतेऽस्मिन् नि+धा—आधारे कि उप० स० तपोनिधिरिव यस्य वा । तपोधने तपस्विनि "विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्" रघुः । "पतत्पतङ्गप्रतिमस्तपोनिधिः" माघः ।

**तपोभृत्** त्रि० तपो बिभर्त्ति भृ—क्विप् तुक् च ६त० । तपोधारके "स्वर्गे तपोभृतां राजन् ! फलं पुण्यस्य कर्मणः" हरिवं० ८अ० ।

**तपोमय** त्रि० तपःप्रचुरः तपःस्रष्टव्यपदार्थालोचनं तदात्मको वा तपस्+मयट् । १तपःप्रचुरे २स्रष्टव्यपदार्थालोचनात्मके परमेश्वरे पु० । "त्रयीमयोधर्ममयस्तपोमयः" भाग० २।४।१९। स्त्रियां ङीप् । "प्रविश्य वदरीं पुण्यां मुनिजुष्टां तपोमयीम्" हरिवं० २६४ अ० । "उपर्य्युपरि तत्रापि गतिस्तव तपोमयी" ७६ अ० ।